श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री अञ्जनशैलनाथस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री अञ्जनशैलनाथस्तोत्रम् ॥

पुलकिनि भुजमध्ये पूजयन्तं पुरन्ध्रीं
भुवननयनपुण्यं पूरिताशेषकामम्।
पुनरपि वृषशैले फुल्लनीलोत्पलाभं
पुरुषमनुभवेयं पुण्डरीकायताक्षम्॥ १ ॥

आजानसौहृदमपारकृपामृताब्धिम्
अव्याजवत्सलमवेलसुशीलमाद्यम्।
आनन्दराशिमनुरागमयावरोधम्
आराधयामि हरिमञ्जनशैलनाथम्॥ २ ॥

आताम्रपादमवदातसुवर्णचेलम्
आपीनबाहुशिखरोज्ज्वलशङ्खचक्रम्।
आविस्स्मिताननममन्ददयाकटाक्षम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ३ ॥

अप्राकृतावयवसंहितसन्निवेशम्
आरूढयौवनमहीनकुमारभावम्।
अम्लानकान्तिमतिवाङ्मनसानुभावम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ४ ॥

आशावकाशसमुदित्वरसर्वगन्धम्
आस्वादयत्सुगमसर्वरसस्वभावम्।
आश्लेषगम्यसुखसंस्पृशनातिरेकम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ५ ॥

आदर्शयन्तमतिसङ्कुचिताक्षिशक्तिम्
आश्रावयन्तमखिलान् बधिरान् प्रकृत्या।

www.prapatti.com

आभाषयन्तमभितो नतमूकवर्गम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ६॥

आधावयन्तमतिमारुतमेव पङ्गून्
आजानुलम्बिभुजयन्तमहो कुबाहून्।
अन्यांश्च कृत्तशिरसः प्रतिजीवयन्तम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ७॥

आजन्मनिर्धनजनानलकेशयन्तम्
अज्ञानपि त्रिदशदेशिकदेश्ययन्तम्।
अह्नाय वन्ध्यमपि मर्त्यमवन्ध्ययन्तम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ८॥

आबद्धकङ्कणमशेषशरण्यतायाम्
आपत्सहायमपराधसहं नतानाम्।
आसन्नसामगसुखालससूरिवर्गम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ९॥

अध्यासितासनसरोजसनूपुराङ्घ्रिम्
आमुक्तवीरकटकायतवृत्तजङ्घम्।
आश्चर्यजानुयुगमप्रतिमोरुकाण्डम्
आराधयामि हरिमञ्जनशैलनाथम्॥ १०॥

आवर्तिनिम्ननिखिलाण्डनिदाननाभिम्
आयामिदोर्विवरकेलिगृहावरोधम्।
आबद्धरत्नमयभूषभुजाचतुष्कम्
आराधयामि हरिमञ्जनशैलनाथम्॥ ११॥

अंसावलम्बिमणिकुण्डलकान्तगण्डम्
आविस्स्मितांशुमधुराधरबन्धुजीवम्।
आस्याब्जसौरभसमुत्सुकदीर्घनासम्
आराधयामि हरिमञ्जनशैलनाथम्॥ १२॥

अर्धेन्दुभास्वदलिकोल्लसदूर्ध्वपुण्ड्रम्
आलोलनीलकुटिलालकचारुवक्त्रम्।
आविर्मयूखमणिचूडमहाकिरीटम्
आराधयामि हरिमञ्जनशैलनाथम्॥ १३ ॥

वादिभीतिकरार्येण रचिता भावबन्धतः।
शोभते वेङ्कटाद्रीशविषया स्तुतिरद्भुता॥ १४ ॥

॥ इति श्री अञ्जनशैलनाथस्तोत्रं सम्पूर्णम्॥

www.prapatti.com